**Shikshan Sanshodhan** : Journal of Arts, Humanities and Social Sciences ISSN(o): 2581-6241
Monthly, Peer-Reviewed, Refereed, Indexed Journal Impact Factor: 7.384
Volume - 8, Issue - 5, May - 2025

DOIs:10.2018/SS/202505021 --:-- Research Paper / Article / Review

# न्यायोद्धरणी

## (Nyāyodharani)

**Satyanath Mathad**
Student, Sanskrit Department, Nutan Vidyalaya, Kalaburagi,Karnataka,India
Email – satyanathmathad@gmail.com

***शोधसार : -"न्यायबोधिनी"*** इति ***"तर्कसंग्रहस्य"*** लोकप्रियव्याख्या । अस्या: व्याख्याया: लेखकः गोवर्धनाचार्यः । गोवर्धनाचार्यः अस्याम् व्याख्यायाम् स्वशोधित विचारान् लिखितवान् । स न श्रद्धया पठितव्य: अस्वारस्यात् इत्यभिप्रायेण अहं एतादृश शोध पत्रिकां रचितवान् । अस्मिन् लेखे हेत्वाभास –आश्रयासिद्धि- व्यतिरेक –परामर्श प्रकरण निरुक्तस्य खण्डनं क्रीयते । तद्धि उपाध्यायोक्तरीत्या शिरोमण्युक्तरीत्या गदाधरोक्तरीत्या वा समर्थ्यते ।।

**कूट शब्दा:-** न्यायबोधिनी, तर्कसंग्रह, हेत्वाभास ,आश्रयासिद्धि, व्यतिरेक –परामर्श ।

## 1. उपक्रम:

***"काणादं पाणिनीयं च सर्व शास्त्रोपकारकं"*** इति वाक्यत: सर्वशास्त्रोपकारित्वेन तर्कशास्त्राध्ययने पठनपाठनक्रमे आदौ न्यायबोधिनीसहिततर्कसङ्ग्रहाध्ययनम् उत्तरदक्षिणयोरपि प्रचलति । इह न्यायबोधिन्यां तत्कर्तृगोवर्धनाचार्या: पराशोधितस्वशोधितविचारान् उल्लिख्य तर्कसङ्ग्रहम् व्याकारि। परन्तु न च एतादृश विचारा: पठितव्या: इत्याशयेन तर्कशास्त्रस्य शुभ चिन्तकोहं तत् खण्डनं पर्वतीकरपदोपाह्वनारायणगुर्वनुग्रहेण कृतवान् । तत्र खण्डने , क्रमत: अनुमानखण्डे उपस्थितानां दोषाणां वस्तुत: परिष्कारत्मकोऽयं लेख: । तथापि संपूर्णत: विषयासत्तया खण्डनमित्येव योग्यं । आदौ हेत्वाभास खण्डने नव्योक्तमतदोषलक्षणत्वस्य स्थापनं तत: परामर्शकरणतास्थापनं यथामति क्रीयते ।।

### 1.1 हेत्वाभासबोधिनीदूषणं

**"हेतुवदाभासन्ते हेत्वाभासा: दुष्ट हेतव: इत्यर्थ:"** । तन्न । नतावत् विग्रहो पूर्वोक्तस्यात् , येन च इदं दुष्टानामेव लक्षणं इति प्रतिज्ञा भवेत् । एतस्यहि दुष्टलक्षणत्वे दोषेषु अतिव्याप्ति: । दोषवैशिष्ट्यं एकवित्तिवेद्यत्वेन ग्राह्यम् तथा सति " **ह्रदो वन्हिमान् धूमात्** " इत्यादौ तथाविधविषयत्वस्य वह्न्यभाववत् ह्रदे सत्वादिति । किञ्च एतल्लक्षणस्य घटादौ अपि अतिव्याप्ति:,"**ह्रदो वह्न्यभाववान् घटश्च"** इति प्रकृतानुमितिप्रतिबन्धकसमूहालम्बनात्मकग्रहे विषयत्वस्य घटेपि सत्वात् । नच दोषस्यापि लक्षत्वे अतिव्याप्तिर्दुर्वारा इति वाच्यम् । धर्मिरूपावच्छिन्नप्रतिबन्धकताया: इष्टत्वात् । भवतां तु तथापरिष्कारे घटे अतिव्याप्तिवारणेपि दोषेऽतिव्याप्ते: दुष्परिहारात् इति ज्ञेयं ।।

अथवा सर्वत्र च हेतुविषयकसमूहालम्बनात्मकग्रहमादाय लक्षणगमनसंभव: इति कथितेपि तादृश विषयत्वस्य हेत्वविषयक-उदासीनपदार्थविषयकग्रहत्वेन आदाय घटादौ अतिव्याप्ति: । एतेन यद्रूपपदस्य उपादेयत्वात् घटादौ तद्वारणेपि दोषेषु तद्दुर्वारात् इत्यपि कोटि: ।

एवं मम तु यद्रूपपदोपादानात् समूहालंबनव्युदासस्तेन वेद्यत्वगर्भस्य घटादौ असत्वात् नातिव्याप्ति: । तथाचेदं "**दोष लक्षणं इति सिद्धं** "। गदाधराचार्या अपि ***"मूलोक्त लक्षणानां दुष्ट हेतु लक्षणत्वे दोषेषु अतिव्याप्ति:"*** इति अग्रिम ग्रन्थेपि पूर्वोक्त प्रकारया अतिव्यप्तिं प्रदर्शयन्ति ।।

**"वह्निमान् प्रमेयत्वात् इत्यत्र प्रमेयत्वरूपहेतौ वह्न्यभावद्-वृत्तित्वरूपव्यभिचारे ज्ञाते वह्न्यभाववत् अवृत्तित्व रूप व्याप्ति प्रतिबन्ध: फलं"** । तदसत् । अस्तु तर्हि साध्याभावदवृत्तित्व रूप व्याप्ति प्रतिबन्ध: किन्तु धूम व्यापक वह्नि सामानाधिकरण्यं व्याप्ति: इति प्रतिज्ञाया: का गति:? यदि च पूर्वपक्ष व्याप्ति: एव अनुषज्यते तर्हि तादृश व्याप्तेरेव असिद्धत्वात् पूर्वोक्तम् न संगच्छते । तादृश व्याप्ते: केवलान्वयिसाध्यकसद्हेतौ अव्याप्यवृत्तिसाध्यक सद्हेतौ वा अव्याप्ते: । न च यदि सिद्धान्त व्याप्ति: अनुजयते तर्हि ***"द्रव्यं समवायेनप्रमेयत्वात्"*** इत्यत्र अवच्छेदकसंबन्धेन गुणादितरे हेतो: वृत्तित्वाप्रसिद्धि: इति वाच्यं । इदं तु बोध्यम् - आदौ तु किं हि वृत्तित्वाप्रसिद्ध्या ? तस्याश्च प्रतिबन्धकताप्रविष्टे अविरोधात् । अत्र खलु ***"यत्सत्वे नियमेन यन्नोत्पद्यते यदभावे च यदुत्पद्यते तत्प्रतिबन्धकम्"*** इत्यस्य इष्तत्वात् । तथा च ***"प्रतियोगीति"*** ज्यान दशायां ***"अप्रतियोगीति"*** ज्यान अनुत्पादात् सिद्धन्तानुसारेणैव प्रतिबन्धकता ।किञ्च ***"प्रतिज्याहानि::"*** ।।

**"विरुद्ध सत्प्रतिपक्षयो: विशेषस्तु विरुद्ध हेतोरेकत्वेन सत्प्रतिपक्ष हेतोर्द्वित्वेन च ज्यातव्य:"** । मेवं । सत्प्रतिपक्षहेतो: द्वित्वेन इत्यस्य सत्प्रतिपक्षौ उभयौ हेतू स्त: इत्यर्थोऽथ सत्प्रतिपक्ष: हेत्वन्तर विधया प्रतिबन्धक: इति वा? । नादि:। यथार्थज्यानानुपलब्धिप्रसंगात् । न द्वितीय: । अविज्यातार्थकत्वात् ।

### 1.2 आश्रयासिद्धिप्रकरणदूषणं

**"अत्र अरविन्दे गगनीयत्वाभावे निश्चिते गगनीयत्व विशिष्टारविन्दे सौरभ्यानुमिति प्रतिबन्ध: फलं"** । तदसत् । नहि साक्षात्तया पक्षे पक्षाताच्छेदकाभाव: निश्चीयते, परामर्शकाले दीधितिकृन्निरुक्ततज्जन्य "***साध्यव्याप्यहेतुमान्पक्ष: साध्यवान्"*** इत्याकारक अनुमितौ घटकपक्षधर्मताया: पक्षे पक्षतावच्छेदकाभावनिश्चय विधया प्रतिबन्धकत्वात् वा ।।

### 1.3 व्यतिरेकप्रकरणदूषणं

**"एवं च वह्न्यभावनिष्ठा व्याप्ति: स्वाश्रयीभूतप्रतियोगित्वसंबन्धेन धूमनिष्ठतया गृह्यते इति व्यतिरेकव्याप्तिमत्वेन व्यतिरेकितया धूमव्यापकवह्नि सामानाधिकरण्यरूपान्वयव्याप्तित्वेन च गीयते"** । तन्न । भवतु तादृश संबन्धेन धूमस्य व्याप्त्याश्रयता किन्तु गुरुकल्पनया तथाकथने प्रतियोगित्व सम्बन्ध: वह्न्यभावत्वरूप: धूमत्वरूप: अवच्छेदकश्च कल्पेत । तद्धि सर्वत्र धूमत्वरूपावच्छेदकस्य आधेयत्वसंबन्धस्यैव कल्पने लघु ।।

न च यत्पदस्य व्याप्तिमत्तापरतया तदुत्तरव्यपदिष्टस्य व्याप्तिमत्त्वात् वह्न्यभावनिष्ठापि व्याप्तिर्कल्पनीया इति वाच्यं । तादृशनियमे मानाभावात् । वस्तुतस्तु तादृशनियमस्यावयवे एव प्रयोग: । तत्र यत्पदद्वारा धूमाधिकरणे वह्न्यभावाधिकरणे वा वह्नि: धूमाभाव: वर्तते इति उदाहरणे व्याप्ति प्रतिपादनात् ।न च स्वार्थेपि तदुपयोग: व्याप्तिज्यानलाभात् इति वाच्यं । वस्तुत: परार्थेपि न तदुपयोग: । न च तत्र यत्पदस्य अनुपयोगे तदुत्तरतया वह्निरपि व्यपदिष्टोस्यात् , येन च तत्रापि व्याप्तिर्भवेत् इति वक्तव्यं । तथा विधस्य वाक्यस्य भ्रमात्मकानुमिति-उदयस्य

**Shikshan Sanshodhan : Journal of Arts, Humanities and Social Sciences** ISSN(o): 2581-6241
Monthly, Peer-Reviewed, Refereed, Indexed Journal Impact Factor: 7.384
Volume - 8, Issue - 5, May - 2025

शब्दत्वविरहात् इष्तत्वात् । शब्दो खलु ***"यथाभूताबाधितार्थविषयकज्ञ्यानवदुच्चरितवाक्यं"*** । इदानीं तु तादृशावयव वाक्योच्चारककर्ता नयथार्थ वक्ता इति तद्व्यवच्छेद: । अत: तादृश नियमे मानाभाव: स्पष्ट: एव ।।

यद्वा यत्पदोत्तरस्य व्याप्तिमत्वे अन्य संबन्धस्य उभयाश्रयतावच्छेदकस्य कल्पनापेक्षया साक्षात्वे धूमनिष्ठा यदि व्याप्तिस्तर्हि लाघवम् । तस्मात् लाघवरूपप्रमाणेन तत्सिद्धि: ।।

### 1.4 परामर्शकरणत्वसमर्थनम्

**"अनुमितौ व्याप्तिज्ञ्यानं करणं परामर्शो व्यापार: अनुमिति: फलं कार्यं इत्यर्थ:"** । तन्न । यदि परामर्शविधया व्याप्तिग्रहस्य कारणत्वं स्यात् , तर्हि व्याप्तिग्रहेण यत्र परामर्शोदय: तत्र व्याप्तिग्रहस्य नाशात् कारणत्वं न स्यात् । ननु परामर्शस्य सव्याप्तित्वेन तादृशसंगतौ मानाभाव: इति चेत् , न । वस्तुत: केवल परामर्शस्य कारणत्वे लाघवात् । अधिकं परामर्श कारणत्वं मणि ग्रन्थे अनुसन्धेयम् । किञ्च यदि व्यापारविधया कारणत्वं कल्प्यते तर्हि केवल परामर्श स्थलेपि अनुमित्युदयात् अन्यथासिद्धिर्दुर्वारा । यत्तु व्यापारविधया नान्यथासिद्धि: इति । तन्न । श्रुतिबोधितकर्तव्यतानिर्वाहार्थम् तद्धि कल्प्यते । यथा ***"ज्योतिष्टोमेन स्वर्ग कामो यजेत्"*** इत्यत्र यागस्य उत्तरकाल क्षणध्वम्सिन: स्वर्गसाधनत्वासम्भवात् अपूर्वो व्यापार: मन्यते। नान्यस्थले तथेति ज्ञेयं । किञ्च ***"स्वार्थनुमितिपरार्थानुमित्यो: लिङ्गपरामर्श: एव करणं"*** इति मूल वाक्यं तत्र सहकरणम् ।।

## 2. उपसंहार:

तस्मात् , यत्वेन प्रकृतानुमितित्वावच्छिन्न तदव्यवहित पूर्वक्षणावच्छिन्न कारणता शालि पदार्थत्वावच्छिन्न विषयता शालि ग्रह प्रतिबन्धकत्वं तत्वं हेत्वाभासत्वं इति हेत्वाभास लक्षणे दुष्टस्यैव लक्षणत्वे दोषे अतिव्याप्ते: परामर्शस्य कारणत्वे अकरणत्वे गरीयस्त्वं आश्रयासिद्धे: साक्षात्तया पक्षता प्रतिबन्धकत्वे गरीयस्तवं इत्यादि रीत्य गोवर्धोनोक्ति: नानुसन्धेया ।।

**सहायकग्रन्थसूची-**

1. डा एन वीलिनाथ (1980); तर्क संग्रह दीपिका प्रकाशिका. मद्रपुरी विश्वविद्यालय, मद्रपुरी.
2. आचार्य: वि मुरलीधर शर्मा, (2018); पञ्चलक्षणी सिंहव्याघ्र लक्षणे च -रघुनाथशिरोमणिकृतया ***दीधित्या*** गदाधरभट्टाचार्यकृतया , महामहोपाध्याय एन् एस् रामनुजाचार्यकृतया दीधितिप्रकाशव्याख्यया ***बालबोधिनी***, राष्ट्रीय संस्कृत विद्यापीठं , तिरुपति, आन्ध्रप्रदेश